YouTube https://m.youtube.com/@ShriDakshinaMurtiShivSadhanaPa

https://whatsapp.com/channel/0029VazNzZhEquiGjJjCVV17

Dakshinamurti Shiv Sadhana Parishad Varanasi

दक्षिणामूर्ति शिव साधना परिषद
सत्यम नगर,सामने घाट, लंका ,वाराणसी
221005

# दक्षिणामूर्ति स्तोत्रं

# गुरुदेव दक्षिणामूर्ति ध्यानम्

वटवृक्षं महोच्छ्रायं पद्मरागफलोज्ज्वलम्,
गारुत्मतमयैः पत्रैर्विचित्ररूप शोभितम् ।
नवरत्न महाकल्पैर्लम्ब-मानैरलंकृतम्,
विचिन्त्य वटमूलस्थं चिन्तयेल्लोकनायकम् ॥ १ ॥

स्फटिकरजतवर्णं मौक्तिकी मक्षमाला - ममृतकलश विद्याज्ञानमुद्रा कराब्जैः ।
दधतमुरगकक्षं चन्द्रचूडं त्रिनेत्रम्, विधृत विविधभूषं दक्षिणामूर्तिमीडे ॥ २ ॥

शङ्करं तु शरच्चन्द्र निभम्भोजमध्यगं, गङ्गाधरं शरच्चन्द्र करोल्लासित शेखरम् ।
प्रसन्नवदनाम्भोजं त्रिनेत्रं सुस्मिताननं, दिव्याम्बरधरं देवं गंधमाल्यैरलंकृतम् ॥ ३ ॥

नानारत्नमयाकल्पमनुकल्प विभूषितं, मुक्ताक्षमालां दक्षोर्ध्वे ज्ञानमुद्रामधः करे ।
वामोर्ध्वें च सुधाकुंभं पुस्तकं तदधः करे, दधानं चिन्तयेद् देवं मुनिवृन्दनिषेवितम्
॥ ४ ॥

Dakshinamurti Shiv Sadhana Parishad Varanasi
Dakshinamurti Shiv Sadhana Parishad Varanasi

# श्रीदक्षिणामूर्ति स्त्रोत्रम्

विश्वं दर्पण दृश्यमान नगरी तुल्यं निजान्तर्गतं
पश्यन्नात्मनि मायया बहिरिवोद्भूतं यथा निद्रया।
यः साक्षात्कुरुते प्रबोध समये स्वात्मान मेवाद्वयं
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥१॥

बीजस्यान्तरिवान्कुरो जगदिदं प्राङनिर्विकल्पं पुन-
र्माया कल्पित देशकालकलना वैचित्र्य चित्रीकृतम्।
मायावीव विजृम्भयत्यपिमहायोगीव यः स्वेच्छया
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥२॥

यस्यैव स्फुरणं सदात्म कमसत्कल्पार्थकं भासते
साक्षात् तत्त्वमसीति वेदवचसा यो बोध यत्याश्रितान्।
यत्साक्षात्करणाद्भवेन्न पुनरा वृत्तिर्भवाम्भोनिधौ
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥३॥

Dakshinamurti Shiv Sadhana Parishad Varanasi

Dakshinamurti Shiv Sadhana Parishad Varanasi

नाना छिद्रघटोदरस्थित महा दीपप्रभा भास्वरं
ज्ञानं यस्य तु चक्षुरादि करणद्वारा बहिः स्पन्दते।
जाना मीति तमेव भान्त मनुभात्येतत् समस्तं जगत्
तस्मै श्रीगुरुमूर्तये  नम इदं श्रीदक्षिणामूर्तये ॥४॥

देहं प्राण मपीन्द्रियाण्यपि चलां बुद्धिं च शून्यं विदुः
स्त्री बालान्ध जडोपमास्त्वहमिति भ्रान्ता भृशं वादिनः।
माया शक्ति विलास कल्पित महाव्यामोह संहारिणे
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥५॥

राहुग्रस्त दिवाकरेन्दु सदृशो माया समाच्छादनात्
सन्मात्रः करणोप संहरणतो योऽभूत् सुषुप्तः पुमान् ।
प्रागस्वाप्समिति प्रबोध समये यः प्रत्यभिज्ञायते
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥६॥

बाल्यादिष्वपि जाग्रदादिषु तथा सर्वास्ववस्थास्वपि
व्यावृत्तास्वनुवर्तमान महमित्यन्तः स्फुरन्तं सदा।
स्वात्मानं प्रकटी करोति भजतां यो मुद्रया भद्रया
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥७॥

Dakshinamurti Shiv Sadhana Parishad Varanasi
Dakshinamurti Shiv Sadhana Parishad Varanasi

विश्वं पश्यति कार्यकारणतया स्वस्वामि सम्बन्धतः
शिष्याचार्य तया तथेव पितृपुत्रा द्यात्मना भेदतः ।
स्वप्ने जाग्रति वा य एष पुरुषो मायापरिभ्रामितः
तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥८॥

भूरम्भांस्य नलोऽनिलोऽम्बर महर्नाथो हिमांशुः पुमान्
नित्याभाति चराचरात्म कमिदं यस्यैव मूर्त्यष्टकम्।
नान्यत्किञ्चन विद्यते विमृशतां यस्मात्परस्माद्विभो-
स्तस्मै श्रीगुरुमूर्तये नम इदं श्रीदक्षिणामूर्तये ॥९॥

सर्वात्मत्वमिति स्फुटीकृत मिदं यस्माद मुष्मिन् स्तवे
तेनास्य श्रवणात् तदर्थमननाद्ध्यानाच्च संकीर्तनात् ।
सर्वात्मत्व महाविभूतिसहितं स्यादीश्वरत्वं स्वतः
सिध्येत् तत्पुनरष्टधा परिणतं चैश्वर्यमव्याहतम् ॥१०॥

॥ इति श्रीमच्छङ्कराचार्यविरचितं श्रीदक्षिणामूर्तिस्तोत्रं सम्पूर्णम् ॥

Dakshinamurti Shiv Sadhana Parishad Varanasi

For more information on spiritual content follow our channel and page -tap on icon/link:

अध्यात्म से जुड़ी अधिक जानकारी के लिए icon/link पर क्लिक करें और चैनल को फॉलो करें।

CLICK HERE

YouTube https://m.youtube.com/@ShriDakshinaMurtiShivSadhanaPa

https://whatsapp.com/channel/0029VazNzZhEquiGjJjCVV17

https://www.instagram.com/dakshinamurtishiv?utm_source=wa4a&utm_campaign=wa_vpl_m2_uvf_web

https://www.facebook.com/sanjay.towardhimaharaj/

https://t.me/dakshinamurtishiv

Dakshinamurti Shiv Sadhana Parishad Varanasi

Dakshinamurti Shiv Sadhana Parishad Varanasi

जो महानुभाव कुछ दिन या आजीवन रहकर ज्योतिष, ध्यान इत्यादि विभिन्न प्रकार की साधनाएं सीखना चाहते हैं या परिवार से दूर भगवान की भक्ति में जीवन बिताना चाहते हैं, उनके लिए रहना-खाना निःशुल्क है।

सम्पर्क करें:-

ज्योतिषाचार्य संजय तिवारी जी महाराज

दक्षिणामूर्ति शिव साधना परिषद,

सत्यम नगर, सामने घाट, लंका, वाराणसी 221005

मोबाइल: 8887813241

8660820545

जो लोग गुरुदेव दक्षिणामूर्ति शिव से दीक्षा लेना चाहते हैं, वे सभी संपर्क कर सकते हैं।